# Gayatri Hridaya

# ગાયત્રીહૃદયમ્

## Document Information

Text title : Gayatri Hridayam

File name : gAyatrIhRidaya.itx

Category : hRidaya, devii, gAyatrI, devI

Location : doc_devii

Author : Vyasa Rishi (by tradition)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Devi Bhagavata Maha-Purana Book 12, Ch. 4

Latest update : Sept. 3, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# Gayatri Hridaya

# ગાયત્રીહૃદયમ્

॥ અથ શ્રીમદ્દેવીભાગવતે મહાપુરાણે ગાયત્રીહૃદયમ્ ॥

નારદ ઉવાચ ।
ભગવન્દેવદેવેશ ભૂતભવ્ય જગત્પ્રભો ।
કવચં ચ શ◌ૃતં દિવ્યં ગાયત્રીમન્ત્રવિગ્રહમ્ ॥ ૧॥

અધુના શ્રોતુમિચ્છામિ ગાયત્રીહૃદયં પરમ્ ।
યદ્ધારણાદ્ભવેત્પુણ્યં ગાયત્રીજપતોઽખિલમ્ ॥ ૨॥

શ્રીનારાયણ ઉવાચ ।
દેવ્યાશ્ચ હૃદયં પ્રોક્તં નારદાથર્વણે સ્ફુટમ્ ।
તદેવાહં પ્રવક્ષ્યામિ રહસ્યાતિરહસ્યકમ્ ॥ ૩॥

વિરાડ્રૂપાં મહાદેવીં ગાયત્રીં વેદમાતરમ્ ।
ધ્યાત્વા તસ્યાસ્ત્વથાઙ્ગેષુ ધ્યાયેદેતાશ્ચ દેવતાઃ ॥ ૪॥

પિણ્ડબ્રહ્મણ્ડયોરૈક્યાદ્ભાવયેત્સ્વતનૌ તથા ।
દેવીરૂપે નિજે દેહે તન્મયત્વાય સાધકઃ ॥ ૫॥

નાદેવોઽભ્યર્ચયેદ્દેવમિતિ વેદવિદો વિદુઃ ।
તતોઽભેદાય કાયે સ્વે ભાવયેદ્દેવતા ઇમાઃ ॥ ૬॥

અથ તત્સમ્પ્રવક્ષ્યામિ તન્મયત્વમયો ભવેત્ ।
ગાયત્રીહૃદયસ્યાસ્યાપ્યહમેવ ઋષિઃ સ્મૃતઃ ॥ ૭॥

ગાયત્રીછન્દ ઉદ્દિષ્ટં દેવતા પરમેશ્વરી ।
પૂર્વોક્તેન પ્રકારેણ કુર્યાદઙ્ગાનિ ષટ્ ક્રમાત્ ।
આસને વિજને દેશે ધ્યાયેદેકાગ્રમાનસઃ ॥ ૮॥

અથાર્થન્યાસઃ । દ્યૌમૂર્ધ્નિ દૈવતમ્ ।
દન્તપઙ્ક્તાવશ્વિનૌ । ઉભે સન્ધ્યે ચૌષ્ઠૌ ।

મુખમગ્નિઃ । જિહ્વા સરસ્વતી । ગ્રીવાયાં તુ બૃહસ્પતિઃ ।
સ્તનયોર્વસવોઽષ્ટૌ । બાહ્વોર્મરુતઃ । હૃદયે પર્જન્યઃ ।
આકાશમુદરમ્ । નાભાવન્તરિક્ષમ્ । કટ્યોરિન્દ્રાગ્ની ।
જઘને વિજ્ઞાનઘનઃ પ્રજાપતિઃ । કૈલાસમલયે ઊરૂ ।
વિશ્વેદેવા જાન્વોઃ । જઙ્ઘાયાં કૌશિકઃ । ગુહ્યમયને ।
ઊરૂ પિતરઃ । પાદૌ પૃથિવી । વનસ્પતયોઙ્ગુલીષુ ।
ઋષયો રોમાણિ । નખાનિ મુહૂર્તાનિ । અસ્થિષુ ગ્રહાઃ ।
અસૃઙ્માંસમૃતવઃ । સંવત્સરા વૈ નિમિષમ્ ।
અહોરાત્રાવાદિત્યશ્ચન્દ્રમાઃ ।
પ્રવરં દિવ્યાં ગાયત્રીં સહસ્રનેત્રાં શરણમહં પ્રપદ્યે ।
ૐ તત્સવિતુર્વરેણ્યાય નમઃ । ૐ તત્પૂર્વાજયાય નમઃ ।
તત્પ્રાતરાદિત્યાય નમઃ । તત્પ્રાતરાદિત્યપ્રતિષ્ઠાયૈ નમઃ ।
પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
સાયંપ્રાતરધીયાનઃ અપાપો ભવતિ ।
સર્વતીર્થેષુ સ્નાતો ભવતિ । સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ ।
અવાચ્યવચનાત્પૂતો ભવતિ । અભક્ષ્યભક્ષણાત્પૂતો ભવતિ ।
અભોજ્યભોજનાત્પૂતો ભવતિ । અચોષ્યચોષણાત્પૂતો ભવતિ ।
અસાધ્યસાધનાત્પૂતો ભવતિ । દુષ્પ્રતિગ્રહશતસહસ્રાત્પૂતો ભવતિ ।
પઙ્ક્તિદૂષણાત્પૂતો ભવતિ । અમૃતવચનાત્પૂતો ભવતિ ।
અથાબ્રહ્મચારી બ્રહ્મચારી ભવતી ।
અનેન હૃદયેનાધીતેન ક્રતુસહસ્રેણેષ્ટં ભવતિ ।
ષષ્ટિશતસહસ્રગાયત્ર્યા જપ્યાનિ ફલાનિ ભવન્તિ ।
અષ્ટૌ બ્રાહ્મણાન્સમ્યગ્ગ્રાહયેત્ । તસ્ય સિદ્ધિર્ભવતિ ।
ય ઇદં નિત્યમધીયાનો બ્રાહ્મણઃ પ્રાતઃ શુચિઃ સર્વપાપઃ
પ્રમુચ્યત ઇતિ । બ્રહ્મલોકે મહીયતે ।
ઇત્યાહ ભગવાન્ શ્રીનારાયણઃ ॥

ઇતિ શ્રીદેવીભાગવતે મહાપુરાણે દ્વાદશસ્કન્ધે
ગાયત્રીહૃદયં નામ ચતુર્થોઽધ્યાયઃ ।

Part of Ch. 4, Book 12 of Devi Bhagavatam.
Encoded and proofread by Sunder Hattangadi

*Gayatri Hridaya*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*